# ह

हकारः व्यञ्जनेषु ऊष्मवर्णभेदः। कण्ठस्थानोच्चार्य्यः। "हकारं पञ्चमैर्युक्तमन्तःस्थाभिश्च संयुतम्। औरस्यं तं विजानीयात् कण्ठ्यमाहुरसंयुतम्" शिक्षोक्तेः पञ्चमादिवर्णसंयोगे उरसोच्चार्य्यश्च। तस्योच्चारणे आभ्यन्तरप्रयत्नः जिह्वाग्रेण कण्ठस्थानस्य अर्द्धस्पर्शः। "अचोऽस्पृष्टा यणस्त्वीषन्नेमस्पृष्टाः शलस्तथेति" शिक्षोक्तेः। बाह्यप्रयत्नास्तु घोषसंवारनादा महाप्राणश्च। अस्य ध्येयरूपं कामधेनुतन्त्रोक्तं यथा "हकारं शृणु चार्वङ्गि! चतुर्वर्गप्रदायकम्। कुण्डलीद्वयसंयुक्तं रक्तविद्युल्लतोपमम्। रजःसत्त्वतमोयुक्तं पञ्चदेवमयं सदा। पञ्चप्राणात्मकं वर्णं त्रिशक्तिसहितं सदा। त्रिविन्दुसहितं वर्णं हृदि भावय पार्वति!"। अस्याधिष्ठातृदेवताध्यानमुक्तं वर्णोद्धारतन्त्रे यथा "करवीरभूषिताङ्गीं साट्टहासां दिगम्बराम्। अस्थिमाल्यामष्टभुजां वरदामम्बुजेक्षणाम्। नागेन्द्रहारभूषाढ्यां जटामुकुटमण्डिताम्। सर्वसिद्धिप्रदां नित्यां धर्मकामार्थमोक्षदाम्। एवं ध्यात्वा हकारन्तु तन्मन्त्रं दशधा जपेत्"। मातृकान्यासेऽस्य दक्षपार्श्वेन्यस्यता काव्यादौ प्रथमप्रयोगे खेदःफलं ३०२०टीकायामुक्तं यथा "सः सौख्यं हस्तु खेदम् विनयमपि च लं क्षः समृद्धिं करोति"। अकारादिवर्णानां प्रयोगे फलादिकं यत्र भवतीति तत्रैवोक्तं यथा "पद्यादौ गद्यवक्त्रे वचसि च सकले प्राकृतादौ समोऽयम्" इति। एतेषां फलाधार निरूपणमध्याकारे "नायको वर्ण्यते यत्र फलं तस्य समादिशेत्। अन्यथा तु कृते काव्ये कवेर्दोषावहं फलम्"तस्य प्रतिप्रसवो यथा "देवता वर्ण्यते यत्र क्वापि काव्ये कवीश्वरैः। मित्रामित्रविचारो वा न तत्र फलकल्पना। देवतावाचकाः शब्दा ये च भद्रादिवाचकाः। ते सर्वे नैव निन्द्याः स्युर्लिपितो गणतोपि वा"।

अस्य वाचकशब्दास्तन्त्रोक्ता यथा "हः शिवो गगनं हंसो नागलोकोऽम्बिकापतिः। नकुलीशो जगत्प्राणः प्राणेशः कपिलामलः। परमात्मा लजो जीवः वराकः शान्तिदोऽकुलः। स्वर्गोऽभयोऽरुणःस्थाणुः कूटकूपनिवारकाः। लक्ष्मीर्हरिहरः शम्भुः प्राणसञ्ज्ञो ललाटजः। सकोपचारणः शूली चैतन्यं पादपूरणम्। महालक्ष्मीः परं नादो मेघनादो विमर्दनः। विन्दुदुर्गौ प्रिया देवी मेघश्यामः महेश्वरः। दक्षपादः सदा शम्भुः शराभो यः सोममण्डलम्" वर्णाभिधानम्। "शुक्रश्चाथ हकारोऽशुः प्राणः शान्तः शिवो वियत्। अकुलो नकुलीशश्च हंसः शून्यश्च हाकिनी। अनन्तो नकुली जीवः परमात्मा ललाटजः" इति बीजवर्णाभिधानम्। "हकारो नकुलीशोऽपि हंसः प्राणोऽङ्कुशः प्रिये। महेशो नकुली चैव वराको गगनं रविः। लिङ्गं शून्या महाशून्यः प्राणश्च परमेश्वरि!" रुद्रयामले ८पटले।

**ह** अव्य० हा–ड। १पादपूरणे अमरः २सम्बोधने ३नियोगे ४क्षेपे ५निग्रहे ६निन्दायां मेदि० ७प्रसिद्धौ च। ८शिवे पु० ९जले १०शून्ये १२आकाशे १३रक्ते १४स्वर्गे १५धारणे पु० मेदि०। १पापहरणे १८चन्द्रे शब्दर० १९सकोपवारणे २०शुष्के च एकाक्षरकोषः।

**हंस** पुंस्त्री० हस–अच्–पृषो० वर्णागमः। स्वनामख्याते १पक्षिभेदे अमरः स्त्रियां ङीष् २निर्लोभनृपे ३विष्णौ ४सूर्य्ये ५परमात्मनि "हंसं तनौ सन्निहितं चरन्तम्" नैष०। ६मत्सरे ७यतिभेदे ८मन्त्रभेदे ९देहस्थवायुभेदे १०अश्वभेदे मेदि० ११गुरौ १२पर्वते शब्दर०। १३शिवे अमरः १४अग्रस्थिते १५श्रेष्ठे हेमच०। १६विशुद्धे अमरः। १७अजपामन्त्ररूपे वर्णे च "हंकारेण बहिर्याति सकारेण विशेत् पुनः। हंसेति सततं मन्त्रं जीवो जपति सर्वदा" इति तन्त्रम्। अजपाशब्दे ८९ पृ० दृश्यम्।

हंसखगस्य भेदाः तन्मांसगुणाश्च यथा "हंसाः पित्तहराः स्निग्धा मधुरा गुरवो हिमाः। वातश्लेष्मप्रदाश्चापि बलशुक्रकरा मताः"भावप्र० तदण्डगुणाः "हंसडिम्बं परं बल्यं बृंहणं वातनाशनम्। पाके लघुतरं प्रोक्तं सर्वामयविनाशनम्"राजनि०। अस्य दर्शनादेः शुभाशुभत्वं वसन्तराजशाकुने उक्तं यथा "काष्ठासु सर्वास्वपि दर्शनेन हंसस्य शब्दस्य तु सर्वसिद्धिः। नामानि हंसस्य शृणोति यस्तु प्रयान्ति नाशं दुरितानि तस्य। चौरैः समं दर्शनमाद्यशब्दे निधिर्द्वितीयेऽथ भयं तृतीये। युद्धं चतुर्थे नृपतिप्रसादः स्यात् पञ्चमे हंसरवे नराणाम्। यतिभेदहंसलक्षणं परमहंसशब्दे ४२३७ पृ० दृश्यम्। प्राणस्य हंसपदार्थत्वे हेतुरुक्तः पदार्थादर्शे "उच्छ्वासे चैव श्वासे च हंस इत्यक्षरद्वयम्। तस्मात् प्राणस्तु हंसात्मा आत्माकारेण संस्थितः। नाभेरुच्छ्वासनिश्वासात् हृदयाग्रे व्यवस्थितिः"।

**हंसक** पु० हंस इव कायति कै–क। १पादकटके नूपुरादौ